
सितम्बर २०१७
( भाद्रपद शु० दशमी तः आश्विन शु० दशमी पर्यन्तम् )

ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् ५ अङ्कः २



सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565

मूल्यम ₹ २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ सितम्बर २०१७ अङ्कः-२

(भाद्रपद शुक्ल दशमी तः आश्विन शुक्ल दशमी पर्यन्तम् वै. २०७४)


| क्र.सं. | अनुक्रमणिका | | पृ.सं. |
|---|---|---|---|
| | सम्पादकीयम् | डॉ० जीतराम भट्टः | |
| १. | शुभं संस्कृतम् | देवीसहाय पाण्डेयः | १ |
| २. | कथं नानुभूयते वर्तमानशिक्षाप्रणाल्यां संस्कृतावश्यकता? | हेमन्त जोशी | २ |
| ३. | शर्करा तिक्तां गता | डॉ० सुदेश गौतमः | ९ |
| ४. | चतुर्थ ज्ञान कोश अग्निपुराणम् | डॉ० उमा पाण्डेयः | ११ |
| ५. | 'ओ' इत्यस्य मित्रं हि ''औ'' | संजीत झा | १३ |
| ६. | वैराग्यम् | सिद्धेश्वर बलराम महाराजः | १४ |
| ७. | वद मम् मित्र सुदामन् भो | अजीत सिंहः | १६ |
| ८. | बालककृतं पुस्तकवर्णनम् | प्रो० कमलेशकुमार छः चोकसी | १८ |


सम्पादकः :- डॉ0 जीतराम भट्टः

सहायकसम्पादकः :- प्रद्युम्नचन्द्रः

दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

ISSN : 2347-1565



© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi



शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (**दिल्लीसंस्कृतअकादमीपक्षे**)

Mode of payment:

Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com
Website : www.sanskritacademy.delhi.gov.in

मुद्रकः

**एस.डी.एम. प्रिन्टर एण्ड पैकर**

हरिनगरम्, नव देहली-110064

मो. : 9811229529

# सम्पादकीयम्

विज्ञान-गणित-प्रविधि-प्रबन्धन-न्यायाभिनयादिविषयाणां शिक्षया सह संस्कृतस्य शिक्षा बालस्य सर्वांगीणविकासाय भवति। धनं मानञ्चार्जयित्वा जीवने कीदृशः व्यवहारः करणीयः इति संस्कृतमेव शिक्षयति। शिक्षा मानवानां संस्करणायैव भवति। भौतिकरूपेण यद्यपि जीविकोपार्जनाय ज्ञानमावश्यकं किन्तु तथैव धनस्य सदुपयोगः कीदृशः स्यात् इत्यर्थमपि शिक्षा परमावश्यकी विद्यते। महत्सु पदेषु स्थित्वाऽपि लोकोपकारः कथं करणीयः जीवने सुखं शान्तिः सन्तोषादयः कथं प्रापणीयाः इत्येतादृशी शिक्षा संस्कृतेनैव मिलति। संस्कृतभाषायां जीवननिर्माणाय सर्वाः कलाः विद्याश्च सन्ति। अतः विद्यालयेषु विविधैः विषयैः सह संस्कृतस्यापि समावेशः करणीय एव, गृहेष्वपि बालेभ्यः संस्कृतश्लोकानां नीतिकथानाञ्च बोधः प्रदातव्यः। संस्कृतज्ञाः संस्कृताः बालाः देशस्य सभ्याः नागरिकाः भविष्यन्ति समाजे साहचर्यस्य सहनशीलतायाः स्थितिश्चापि प्रगाढा भविष्यति। अतः बालेभ्यः संस्कृतशिक्षाप्रदानाय निवेदयत्यं जनः।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदकः**
**डॉ. जीतरामभट्टः**
**सचिवः**

# शुभं संस्कृतम्

– देवीसहाय पाण्डेयः

देव भाषेति यत् शब्दितं सत्कृतं तत्तु जानय शुभं संस्कृतं संस्कृतम्।
यत्र च ब्रह्मणोवेदवाणी वृता संहिता सत्कृता धर्मशास्त्राणि च,
यत्र चारण्यका उपनिषद्ब्राह्मणाः तत्तु जानय शुभं संस्कृतं संस्कृतम्।
यत्र रामायणं आदि काव्य कृतं दिव्यतादर्शभूमौहि बाल्मिकिना,
यत्र व्यासो लिखितवान् महाभारतं त्तत्तुजानय शुभं संस्कृतं संस्कृतम्।
यत्र षड्दर्शनानि पुराणनिवै ज्ञानविज्ञान शास्त्राणि विविधानि च,
यत्र कल्याण कर्मणिमनोयोज्यते त्तत्तुजानय शुभं संस्कृतं संस्कृतम्।
यत्र भासस्तथा कालिदासादयो माघश्रीहर्षभवभूति बाणादिका,
विश्व विख्यात कवयोवभूवुस्सदा त्तत्तुजानय शुभं संस्कृत संस्कृतम्
अस्य मूलाश्रिता विश्वभाषाखिला भावनाभविता यस्य विलसन्तिवै
विश्वबन्धुत्व संदेश युक्तं महत्वतुजानयशुभं संस्कृतं संस्कृतम्।
येन पूर्वे तथा पश्चिमे भारते दक्षिणे उत्तरे मध्यभागेशुभे
यत्र राष्ट्रैकता सूचविस्तारितं तत्तु जानय महत् संस्कृतं संस्कृतम्।

**– दीपलवकुशनगरम्**
**रामघाटः आयोध्या**
**फैजाबादः उत्तर प्रदेशः–22509**

# कथं नानुभूयते वर्तमानशिक्षाप्रणाल्यां संस्कृतावश्यकता?

- हेमन्त जोशी

संस्कृतं नाम परिष्कृतम्। ललिता मनोज्ञा मनोरमा हृद्या परिष्कृता च भाषा संस्कृतम्। भाषेयं देववाणी, सुरभारती, अमरभारती–इत्यादिकैः सार्थकैर्नामभिः स्वतः सिद्धं गौरवं प्रकटयति। वस्तुतस्तु संस्कृतमस्माकं सभ्यतासंस्कृतयोरजस्रं स्रोतः। संस्कृतभाषायाः संरक्षणे पोषणे चावलम्बितं भारतीयसंस्कृतेः स्वरूपस्य संरक्षणं पोषणञ्च। अतएव राष्ट्रैक्यसम्पादने, राष्ट्रैक्यसंरक्षणे, राष्ट्रैक्यसंवर्धने च संस्कृतं न कदापि विस्मरणीयम्। संस्कृतशिक्षणेन भावात्मको नैतिकश्च विकासो जायते। संस्कृताध्ययनेन विद्यार्थिनः सदाचरन्ति। मानसिक सङ्कीर्णता संस्कृतफेनकेन प्रक्षाल्यते। संस्कृतसाहित्यपठनेन विद्यार्थिषु राष्ट्रियताभावाः समुत्पद्यन्ते। जातीयतां प्रान्तीयतां क्षेत्रीयतां भाषावादं च विस्मृत्य भारतीयतायाः समर्चका बोभूयन्ते। **''उदारचरितानां तु वसुधैव कुटुम्बकम्''** इत्यनुसारमाचरन्तो विश्वमेव कुटुम्बं मन्यन्ते। संस्कृतसाहित्ये भारतदेशस्य समुन्नतकल्पनाया दर्शनं नानायुगेषु प्रलभ्यते, राष्ट्रोन्नत्ये शुक्ल–यजुर्वेदस्य एकस्मिन्मन्त्रे राष्ट्रस्य विविधाङ्गनामभिवृद्धये उत्तमेयं प्रार्थनोपलभ्यते। स्वतन्त्रभारतस्याद्य शिक्षाप्रणल्यां विद्यालयेषु चेयमेव सांस्कृतिकी प्रार्थना भवेत् यथा–

**''आ ब्रह्मन् ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम्। दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णुरथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम्। निकामे निकामे नः पर्जन्यो वर्षतु। फलवत्यो न ओषधयः पच्यन्ताम्। योगक्षेमो नः कल्पताम्''**[2]

मंत्रोऽयं मानवेन श्लाघनीयोऽनुकरणीयश्चास्ति। वैदिकऋषिः समेषामभ्युदयं कामयते। मानवस्य प्रथमं कर्तव्यं वर्तते यत् सर्वेषां रक्षां सहायञ्च कुर्यात्। ऋषिः भगवन्तं कामयते यानहं प्रत्यक्षत्वेन पश्यामि यान्न पश्यामि, तेषां समेषां भद्रं कल्याणञ्च

भूयात्। तद्यथा-

**याँश्च पश्यामि याँश्च न तेषु मा सुमतिं कृधि।।**[3]

संस्कृतवाङ्मये विश्वबन्धुत्वस्य विश्वकल्याणस्य, विश्वसौहार्दस्य च भावना यत्र तत्र सर्वत्र वरीवर्ति। विश्वबन्धुत्वकामनायाः कीदृशं वर्णनं विधत्तमस्ति, यथात्र काम्यते-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभागभवेत्।।**

न केवलं देशेऽपितु सकलविश्वस्मिनधुना आतंकवादतण्डवो वर्धमानो दृश्यते। एतन्निराकर्तुं संस्कृतवाङ्मये बहुत्र बहुकिमपि प्रतिपादितं वर्तते। यद्युपरोक्तविश्वबन्धुत्वभावना अभिलक्ष्य आत्मसात्कृत्य च जीवनं यो जीवति, असौ आतंकवादसदृशं दुष्कार्यं कदापि विधातुं न प्रवर्तते । एतन्निराकरणाय संस्कृतसत्साहित्याध्ययनमेवानिवार्यत्वेन भवितव्यम्।

विविधोदात्तभावनाः पारस्परिकमीर्ष्याद्वेषकलहादिकमपाकुर्वन्ति येन सर्वे माधुर्याप्लाविता भवन्ति। श्रीमद्भागवतानुसारमपि ईश्वरभक्तः कस्मायपि नासूयति, यतेहि सोऽभिजानाति सकलभूतप्राणिहृदि ईश्वर एव जीवरूपे विराजते, अतः कस्मै अपि द्वेषः परमेश्वराय द्वेषकरणमस्ति यथा-

**मनसैतानि भूतानि प्रणमेद् बहु मानयन्।**
**ईश्वरो जीवकलया प्रविष्टो भगवानिति।।**[4]

अद्यतनीया शिक्षाप्रणाली कर्त्तव्यबोधमनादृत्याधिकारचेतनां प्रति जागरयति। तद्विपरीतं संस्कृतग्रन्थेषु-

**कर्मण्येबाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।**[5]

सुमतिः सद्बुद्धिर्वा जीवनस्याधारशिला वर्तते। सद्बुद्ध्या जीवने विवेक आयाति सुमत्या च कर्त्तव्याकर्त्तव्यबोधो जायते। अतः वेदेषु सुमतिप्राप्यर्थं प्रार्थना विहिताऽस्ति। सुमत्येव मानवो लोकहितस्य, समाजहितस्य, राष्ट्रहितस्य, विश्वहितस्य च कामनां करोति-

**ता-सवितुर्वरेणस्य चित्राम् आहं वृणे सुमतिं विश्वजन्याम्।**
**यामस्य कण्वो अदुहत् प्रपीना सहस्रधारां पयसा महीं गाम्।।**[6]

**त्वं विष्णो सुमति विश्वजन्याम् अप्रयुतामेवयाजो मति दा।**
**पर्चो यथा नः सुवितस्य भूरेरश्वातः पुरुश्चन्द्रस्य रायः।।**[7]

वर्तमानशिक्षाप्रणालीद्वारा नैव सम्भवति आदर्शनिर्धारणम्। तद्भावे तस्य प्राप्तिर्दिवास्वप्न इव प्रतिभाति। अद्यतनीया शिक्षाप्रणाली नैतिकमूल्यकानि अवदातु सर्वथा समर्था। परिणामतो रक्षकाः भक्षकाः, चिकित्सका हन्तकाः, न्यायप्रदन्यायाधीशा उत्कोचग्राहिणः, चित्तापहारका गुरवश्च वित्तापहारकाः सञ्जाताः। सम्प्रति आधुनिकशिक्षया गुरुशिष्योः सम्बन्धोऽपि पतितः। प्राचीनभारतीयशिक्षाव्यवस्थायां गुरोर्महत्त्वं सर्वोपरि निर्धारितमासीत्। ब्रह्मविष्णुमहेशानाम्नाऽभिज्ञायतेस्म गुरू। गुरूशुश्रूषया ब्रह्मलोकप्राप्तिभर्वति। यथा अकथितमस्ति वाग्ङ्मये-

**इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्।**
**गुरूशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते।।**[8]

परमाधुनिक शिक्षायां गुरुशिष्यसबन्धे गुरुः शिक्षा विक्रेता शिष्यश्च शिक्षाक्रेता अभवताम्। तत्प्रभावेणाद्य देशेऽस्मिन् शिक्षाऽतीव महार्घा जाता। इदानीन्तु शिष्यादधिकाधिनसंग्रहणमेव प्रधानोद्देश्यं गुरोः। प्राचीनकाले तु गुरूशिष्यौ सम्मिल्य द्वयोः कल्याणार्थं शान्तिपाठं कृतवन्तावास्ताम्-

**ऊँ सह नाववतु। सहनौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु। मा विद्विषावहै।।**[9]

आधुनिककाले परितो दृश्यते सदाचाराभावः। अतएव वर्तमान-शिक्षाप्रणाल्यां संस्कारयुक्तआचारशिक्षाया नैतिकशिक्षायाश्च महदावश्यकताऽस्ति। सर्वाधिकादरणीया संस्कृतभाषैव, या बालकेभ्यः सदाचारशिक्षां प्रदातुं शक्नोति। सदाचारेण नरः कीर्तिं भूतिञ्च लभते।

**'आचारः परमो धर्मः'**[10]

महाभारते वर्णिमस्ति यत् सदाचारेण विपत्तेर्विनाशः श्री धर्मधनानाञ्च बृद्धिर्भवति-

**आचारः फलते धर्म आचारः फलते धनम्।**
**आचाराच्छ्रियमाप्नोति आचारो हन्त्यलक्षणम्।।**[11]

युवानः सदाचारिण स्युः अतः संस्कृताध्ययनं परमावश्यकम्। तद्यथा-

सत्यं वद। धर्मं चर स्वाध्यान्माप्रमदः। मातृदेवोभव। पितृदेवोभव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवतिव्यानि। नो इतराणि।।12

सामप्रतज्तु क्वचिद्गन्तुं गृहाद् निर्गच्छति सति जनो विभेति, परं संस्कृते-

**बालो वा यदि वा बृद्धो युवा गृहमागतः।**
**तस्य पूजा विधातव्या सर्वस्याऽभ्यागतो गुरूः।।**[13]

सदाचारस्य वचनाऽमृतानि संस्कृतेनैव उपहृतानि सन्ति।

**''उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत''।।**[14]

**श्रद्धावाँल्लभते ज्ञानम्।।**[15]

**''असतो मा सद् गमय। ''''तमसो मा ज्योतिर्गमय।''**

**''मृत्योर्माऽमृतगमय।''**[16]

इति सदाचारितवेदवाक्यं संस्कृत-भाषायामेवोपलभ्यते।

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।।**[17]

**सत्यमेव जयति नानृतम्।**[18]

सर्वदैवास्माभिः सन्मार्गोऽनुकरणीयः, इत्येव कल्पना विहितास्ति

**विश्वानि देव सवितर्दुरितानि परासुवः।**
**यद्भद्रं तन्न आसुव।।**[19]

संस्कृताध्ययेन मानवानां कुविचाराः सुविचारेषु परिवर्तन्ते। संस्कृताभावेन एव राष्ट्रेऽस्मिन् भ्रष्टाचार आतङ्कवादश्च प्रतिदिनं द्रुतगत्या वर्धते। संस्कृतवाग्ङ्मये किल तादृशाः सदाचारयुक्तोत्तमविचारा विद्यन्ते, यानात्मसात्कृत्य मानवः कदापि भ्रष्टाचारं कर्तुं न प्रभवति, यथात्र

**ईशा वास्यमिद सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम्।।**
**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।।**[20]

भ्रष्टाचारोत्कोचादिकमपाकर्तुं मन्त्रद्वयं परमौषधिरस्ति। गतदिनेष्वेव अम्बेडकर विश्वविद्यालयस्य दीक्षान्तसमारोहे दीक्षान्त भाषणे भाषमाणा देशस्य महामहिम्नो राष्ट्रपतयः श्रीमन्तः प्रवणमुखर्जी-महाभागा अवदन् यद्देशे संविधाननियमैः दुष्प्रवृत्तसमाजं नैव परिष्कर्तुं शक्यते। लिखितरूपेण नियमा विद्यन्ते परं न ते नियमाः

परिपाल्यन्तेऽधिकाधिकजनैः। साम्प्रतं समग्रेऽपि राष्ट्रे नैतिक शिक्षाया आवश्यकता दरीदृश्यते।[21]

नैतिकशिक्षाम् आत्मसातकृत्यैव विविधापराधाधिकमवरोद्धुं शक्यन्ते। देशऽस्मिन्महिलाभिः समं घटनाऽपराधबलात्करादयः प्रतिदिनं देशस्य कोणे कोणे बर्धमाना दृश्यन्ते। एतेषाम् उपायो विद्यतेऽस्माकं नैतिकशास्त्रग्रन्थेषु। परजनस्य जाया मातृवन्मतास्ति, यथा-

**मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत्सर्वभूतेषु यः पश्यति सः पण्डितः॥**[22]

त्रिप्रकारिका भवति माता। जन्मदात्री प्रथमा, लालयित्री पालयित्री वा द्वितीया, तृतीया च भूमिमाता। इदानीन्तने काले भूमिविक्रयस्यापि महान् व्यवसायश्चलति देशे। बहवो जना भूमिमातरं विक्रीय अर्थोपार्जनं कुर्वाणासन्ति, एतावदेव नापितु देशस्य राजनेतारोऽपि भूमिमातृघोटालायां गृह्यन्ते। परं कीदृशी कल्पना ऋषेः-

**''माता भूमिः पुत्रोऽहं पृथिव्याः॥''**[23]

अद्यतनीया समस्या वर्तते पर्यावरण प्रदूषणस्य प्रमुखत्वेन। प्राकृतिक-मानसिक-शारीरिक-आत्मिक रूप पर्यावरण प्रदूषण परिष्कारार्थं कथमस्माकं संस्कृतवाग्ङ्मयमुपयोगि वर्तते। अभिज्ञानशाकुन्तले कविकुलगुरुमहाकविना कालिदासेन शकुन्तलायाः पतिगृहगमनकानले तस्या वृक्षादीन् प्रति सुकृत्यवर्णनं कृतमस्ति। यथ्यथोक्तम्!-

**पातुं न प्रथमं व्यवस्यति जलनं युष्मास्वपीतेषु वा**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगुहं सवैर्रनुज्ञायताम्॥**[24]

आदर्शभूता शिक्षाप्रणाली वेदेषु, पुराणेषु, उपनिषत्सु, रामायणे, नैतिकशास्त्रेषु च सर्वत्रैवोपलभ्यते। अतः संस्कारप्रसूता शिक्षाप्रणाली एवास्मत्कृते उपयोगिनी वर्तते। संस्कारविहीनबालान् संस्कारयितुं वर्तमान शिक्षाप्रणाल्यां महती आवश्यकताऽनुभूयते संस्कृतभाषायाः। एतत्सन्दर्भे डॉ० हरिनारायणदीक्षितवर्य्यैलिखितं स्वविरचितमहाकाव्ये-

**रक्षितुं न च शक्यन्ते विना संस्कृतशिक्षणम्,**
**सभ्यतासंस्कृतिर्लोके भारतस्य च शेवधिः॥**[25]

मैकाले प्रतिपादिता शिक्षाव्यवस्था निखिलेऽपि भारते राजतेऽधुना, मैकालेमहोदयात् प्रादुर्भूतामाधुनिक शिक्षापद्धतिमनुवर्तमाना भारतीयाः केवलं रूपवर्णेनैव भारतीयाः, आहारेण व्यवहारेण मनसातुआङ्ग्लीया एव। "**सा विद्या या विमुक्तये**" इति वैदिककालीनशिक्षायाः सदुद्देश्यमासीत्, परं मैकालेकृपया"सा विद्या या नियुक्तये" इत्युद्देश्यं सञ्जातम्।

शिक्षा विमुक्तये नापितु नियुक्तये, अतएव संस्कृताध्ययनमनिवार्यम्। संस्कृताध्ययनेन शरीरं संस्कृतं, स्वस्थं, पुष्टं, मनोविकसितं, विकाररहितं तुष्टं, बुद्धिः निर्दोषा गुणवती संस्कारवती, आत्मा मोहरागद्वेषासूयादिदोषमुक्तो भवति।
संस्कृतभाषा तु विद्यारसिकैः श्रीमोक्षमूलप्रभृतिभिरपि भूरिशः प्रशंसितां यथा

The Greatest language in the world, the most wonderful and the most perfect."[26]

वर्तमानशिक्षाप्रणाल्याः प्रमुखाद्देश्यं वर्तते बालकस्य सर्वाङ्गीण विकासः। सर्वविकासाय सेवितव्यं संस्कृतस्य सत्साहित्यम्। किञ्च कुत्रान्यत्र विद्यते वेदोपनिषद्सदृशं सत्साहित्यं, कुत्र च भासते रामायण-महाभारत-सदृशं, ग्रन्थरत्नं कुत्र च वर्तते पुराणप्रतिमः सदेतिहासः, कुत्र च राजते मनु-याज्ञवल्क्य-कल्प-स्मृतिशास्त्रं, कुत्र चाभिलषन्ति वाल्मीकि-व्यास-कालिदास-बाणसदृशाः कवीन्द्रा, कुत्र च सन्ति शुक्र-वाचस्पति-चाणक्यसदृशा नीतिविदः, कुत्र च विराजन्ते शङ्कराचार्यसदृशाः दार्शनिकाः, कुत्र च विभासन्ते वाराह मिहिर-भट्टोत्पल-प्रभृतयो गणितनिधयः, कुत्र वा विलोक्यन्ते नागार्जुन-गोरक्षनाथाव्यो रसायनविद्या महोदधयः।

संस्कृताध्ययनं न केवलं विद्यार्थिहिताय, प्रत्युत समाजस्य राष्ट्रस्य च हिताय परमावश्यकम्। अतएव त्रिकालतीता सार्वदेशिका सर्वजनसंस्कृतभाषा प्रथमकक्षातः द्वादशकक्षा पर्यन्तं पाठ्यक्रमेऽवश्यं निवेशनीयां संस्कृतवाङ्मसयोक्तसदाचारामृतवाक्यैः नैतिकमूल्यानि हृदये स्थिरीभवन्ति, येन जना न्यायात् पथः कथमपि न प्रविचलन्ति।

संस्कृतः संस्कृताश्रिता। यदि संस्कृतं नास्ति, तदा भारतीया राष्ट्रियसंस्कृतिर्नास्ति। यदि च भारतीया संस्कृतिर्नास्ति तदा नास्त्येव भारतम्। संस्कृतिर्रक्षणीया चेद् रक्षणीयं संस्कृतम्। संस्कृतं रक्षितन्तु भारतं संरक्षितम्। अतः संस्कृतं विहाय भारतीयो भारतस्यापि परिभाषां कर्तुं न शक्नोति।

अत्रायं निष्कर्षो ज्ञेयो यद् वर्तमानशिक्षाप्रणाल्यां संस्कृतविषयद्वारा भारतीयसभ्यतासंस्कृतिरक्षणाय सदाचार-प्रतिपादिनी नैतिक शिक्षा प्रदेया। यया भारतमिदं समृद्धं विमलं, मनोरमञ्च भवेत्।

## सन्दर्भ सूची


1. हितोपदेश-मित्रलाभः श्लोक संख्या 71
2. यजुर्वेदः-22-22
3. अथर्ववेदः- 17-1-71
4. श्रीमद्भागवतम्-3-19-34
5. श्रीमद्भगवतगीता-2-34
6. यजुर्वेदः-17-47, अथर्व-7-15-1
7. ऋग्वेदः 7-100-2
8. मनुस्मृतिः 2-223
9. कठोरपनिषद्ः मङ्गलाचरणम्
10. मनुस्मृतिः 1-108
11. महाभारत-ड़ोगपर्व-113-5
12. "तैत्तिरीयोपनिषद्", शिक्षावल्ली, अनुवाक् 11
13. हितोपदेश-मित्रलाभः -112
14. कठोपनिषद् (3वल्ली, मन्त्रः 14)
15. श्रीमद्भगवद्गीता-4-39
16. बृहदारण्यकोपनिषद्।
17. ऋग्वेदः 5-82-5 यजुर्वेदः 30-3
18. मुण्डकोपनिषद्, तृतीयमुण्डकः प्रथमखण्डः 6
19. ऋग्वेदः 5-82-5 यजुर्वेदः 30-3
20. ईशावास्योपनिषद्-1,2
21. अम्बेडकविश्वविद्यालयस्य दीक्षान्तभाषाम्।
22. हितोपदेशमित्रलाभः-14
23. अथर्ववेदः- 12-1-12
24. अभिज्ञानशाकुन्तलम् 4-3
25. भारतमाताब्रूते महाकाव्यम् 9-34
26. Sacred Books of the East



**- शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**लखनऊ परिसरः**

# शर्करा तिक्तां गता

- डॉ० सुदेश गौतम

सुस्वादुः मधुरं भोज्यं नानारससमन्वितम्।
तया पात्रे तथा क्षिप्तं शर्करा तिक्तां गता।।१।।

सौरव्यपूर्णं गृहं तस्य त्रुटिर्न कापि दृश्यते।
विवर्णः अतिथिं दृष्ट्वा शर्करा तिक्तां गता।।२।।

लावण्य-यौवन-रूपविलासैश्च समन्विता।
अपठितेति विज्ञाय शर्करा तिक्तां गता।।३।।

यथा तथावकाशेन वल्लभो गृहमागतः।
प्रिया पितृगृहं याता शर्करा तिक्तां गता।।४।।

मतैः मन्त्रीपदं प्राप्य मिलति न जनैः सह।
रूपं दृष्ट्वा तदा तस्य शर्करा तिक्तां गता।।५।।

जीविष्यामि कथं लोके वदति या क्षणे क्षणे।
दृष्टाक्रोडे यदान्यस्य शर्करा तिक्तां गता।।६।।

मतदानं महापुण्यं जनाः कुर्वन्तु चेतसा।
राजधान्याः स्थितिं दृष्ट्वा शर्करा तिक्तां गता।।७।।

त्वमेव माधवो कृष्णः त्वमेवास्ति मम प्रियः।
गता सा बल्लभान्येन शर्करा तिक्तां गता।।८।।

एकदा प्राप्य संयावं हस्तं पृष्टे करोति सः।
भक्षयति करं श्वान् तं शर्करा तिक्तां गता।। ९।।

संयाच्य कारयानं सः परीक्षाभवनं गतः।
नृपनरैः धृतः मार्गे शर्करा तिक्तां गता।। १०।।

**- प्राचार्य हि० आ० सं० महाविद्यालयः**
**जांगला ( कुरुजाङ्गलम् )**
**शिमला, हि० प्रदेशः २५०१०१**

# चतुर्थ ज्ञान कोश अग्निपुराणम्

-डॉ० उमा पाण्डेयः

विश्वस्य प्रथम युगस्य सतयुगस्य प्रथम ज्ञानकोशः अस्ति वेदः। द्वितीय ज्ञान कोश अस्ति द्वितीय त्रेतायुगस्य रामायणम्। तृतीय ज्ञान कोश अस्ति तृतीय युगस्य द्वापरस्य महर्षि कृष्ण द्वैपायन कृत महाभारतम्। कलियुगस्य चतुर्थ युगस्य नैमिषारण्ये ज्ञान सत्रे प्रस्तुत पुराण साहित्ये अग्निपुराणम् चतुर्थ ज्ञान कोश अस्ति । अग्निपुराणे लिखितम् अस्ति ''आग्नेये हि पुराणेऽस्मिन सर्वा विद्याः प्रदर्शिताः (अग्निपुराणम, ३८३/५१)

अग्निपुराणस्य ३८३ अध्यायेषु रामायण-महाभारत हरिवंश कथाः, सृष्टिवर्णनम्, संध्यापूजा-संस्कार-दीक्षा-अभिषेक-प्राण प्रतिष्ठा-भूगोल-खगोल-संग्राम विजय विद्या-विविध विषय वर्णनम् च सन्ति।

दशावतारेषु बुद्ध कल्कि अवतार द्वयम् भविष्यस्य वर्णितम्। माया मोह मय रूपे शुद्धोदन पुत्रबुद्ध जन्म १६२०-१५४० ई०पू०) जातम्। कालान्तरे ईश्वरस्य माया मोह एव 'आर्हत' (महावीर जैन ५९९-५२७ ई०पू०) रूपे प्रकटितः वेद धर्म वंचित पाखण्ड प्रचारः जातः अनेन। तदन्तरम् श्रीविष्णुयशा पुत्र कल्कि जन्म भविष्य वाणी अस्ति यस्य पुरोहितः याज्ञवल्क्यः वर्णितः। (अध्याय-16) वेदमन्त्र भाष्यम पुराणम्-गायत्री मंत्रस्य प्रत्येक शब्दस्य तात्पर्य वर्णनम् कृतम।(अध्याय-216)

विविध कामना पूर्ति हेतु वेद मंत्र प्रयोग निर्देशनम् वर्णितम् (अध्याय-२५९-२६२) व्यवहार शास्त्रम् विधि संहिता पर्यायत्वेन विद्यते। उन्मत पागल, रोगी, नावालिक, भयभीत, प्रस्तुत व्यवहार विषयः न्यायालये विचारणीयः नासीत् (अध्याय-253)

नानारोगनाशक औषधि वर्णनम् अग्निपुराणे विद्यते यथा-तिलतैल कवलम् (कुतला) दन्तपीडा नाशकम्, लहसुन-अदरख-सहिजन रस प्रयोगेण कर्णशूल समाप्तिः भवति वाकुची तिल भोजनम् एक वर्ष पर्यन्तम् कुष्ठ रोग नाशकम् भवति त्रिफला मधु शर्करा सेवनम सर्वरोगनाशकम् भवति। अदरख रस मधु सहितम् पानम् श्वास,

कास (खाँसी) प्रतिश्याय (जुकाम) कफ विकार नाशकम् भवति। 'मसूर' वेदना नाशकम् वर्णितम् (अ० 285)

मृत्युंजय योग वर्णने अस्ति (अ० २८६)-मधु घृत त्रिफला गिलोय सेवनम् रोगमुक्तम् त्रिशतवर्षायु दायकम् भवति। ब्राह्मी चूर्णयुक्त दुग्धपानेन दीर्घ जीवन प्राप्तिः भवति। निम्ब तैलस्य मधु सहितनस्य प्रयोगेण स्वस्थ सानंद शतायु प्राप्तिः भवति।

३१०२ ई०पू० तः पूर्वम् द्वापर युगस्य आयुर्विज्ञानम् इदम् वर्तमान शोधार्थम् विषयः वर्तते। अश्व गज गवायुर्वेद विषहारी मंत्र औषध चिकित्सा, वेद मंत्र द्वारा कामना पूर्ति सदृश लोकोपयोगी उपायाः वर्णिताः सन्ति।

ऋग्वेदस्य प्रथम मंत्र " अग्निमीले पुरोहितम्। यज्ञस्य देवमृत्विजा हातारम् रत्नधातमम्" जपानुष्ठानेन मनोकामना पूर्तिः भवति सूर्याघ्य दानेन उपस्थान प्रार्थना मंत्र प्रयोगेण मानसिक कष्ट समाप्तिः भवति। स्वस्ति न इन्द्रोवृद्धश्रवाः स्वस्तिवाचन द्वारा कल्याणम् भवति।

यजुर्वेदस्य त्र्यम्बकम् यजामहे ........मंत्र हवनम् भय नाशकम् भवति। गणानां त्वा गणपतिः....... मंत्र द्वारा चतुष्पथे सप्तधान्य हवनेन सम्पूर्ण जगत् वशीकरणम् भवति। सामवेदस्य 'इन्द्र' पद युक्त मंत्र जपेन सौभाग्य प्राप्तिः भवति।

व्याकरण सार अध्याये माहेश्वर सूत्र अइउण्० वर्णन सहितम् संस्कृत व्याकरणस्य काव्य शास्त्रस्य च प्रथम विवरणम् विस्तारेण विद्यते। अतः पाणीनि पूर्वम् (1000ई०पू०) अपि भाषा विज्ञानम् लोक प्रचलितम् आसीत्।

काव्य शास्त्रस्य प्रथम वर्णनम्, प्रथम शब्द कोशः अष्टांगयोगस्य च विस्तृत विवरणम् च वर्तमाने प्रचलित पंचदेव पूजा विधानम्, मंदिर मूर्ति भवन वास्तुशास्त्रम् इति सर्वम् 5000 पूर्व सम्पादित अग्नि पुराणे वर्तते।

**- कार्यकारी सम्पादक**
**प्रभातम् संस्कृत पत्रम् दैनिकम्**
**ई-1852 राजजीपुरम,**
**लखनऊ 226017 (उ0प्र0)**

# ‘ओ’ इत्यस्य मित्रं हि ‘‘औ’’

- संजीत झा

बालो गच्छति बालौ हसतः
पश्य त्वमत्र त्तौ कथं न पठतः।
हसनं पठनं भ्रमणं क्रीडा
कुर्वन्तं नहि भवति हि पीड़ा।।

‘गो’ इत्यस्य द्विवचनं ‘गावौ’
‘ग्लौ’ इत्यस्य द्विवचनं ग्लावौ।
‘स’ इत्यस्य द्विवचनं ‘तौ’
‘ओ’ इत्यस्य मित्रं हि ‘औ’।।

मातुलचन्द्रः उदेति रात्रौ
एति आनन्दं जनो हि पात्रः।
तपति नु सूर्यो हिमांशुः शीतः
यच्छति वरं यदा हि प्रीतः।।

‘गो’ अस्ति माता चन्द्रः ‘ग्लौ’।
‘ओ’ इत्यस्य मित्रं हि ‘औ’।।

-टीजीटी संस्कृत,जीबीएसएसएस,
जंगपुरा नव देहली-१०००१४

# "वैराग्यम्"

- डॉ० सिद्धेश्वर-बलराम महाराजः

विख्यातः साधुः कबीरः काश्यां निवसन् वस्त्रवाय कर्म (कपडे बुनने का कार्य) कुर्वन् जीवनं सुखेन यापयामास। लुहीति सद्धाङ्गिनी स्वकर्मदक्षा कबीरनुकूलमेव वर्तते स्म।

एकदा हरिदासनामा कश्चिद् भक्तः कबीरदर्शनाकाङ्क्षी काशीं जगाम्। कबीरसदनं प्राप्तः स कबीरस्तत्र नास्तीति ज्ञातवान्। कबीरपत्न्या तत्स्वागतं विधाय कुशलं पृष्ट्वा तदागमन हेतुं पप्रच्छ। तेन भणितम् – केवलं कबीर दर्शनायागतोऽस्मि। क्व यातः पूज्यः कबीरः, तद्भवती कथयितुमर्हति।"

साऽब्रवीत्–"कस्यचिन्निधनं प्राप्तस्यात्यसंस्काराय श्मशानं भूमिं स गतः। तद्भवान् प्रतीक्षां करोतु।" 'यद्यहं तत्र गत्वा तद्दर्शनं करोमि चेत्, कथं वा भवती मन्यते?" सोऽन्वयुङ्क्त। "यशेष्टं करोतु भवान्।' सावदत्! "परं नाहं कबीरं जानामि प्रागदृष्टत्वात् । अयमेव कबीर इति कथं वेदिम्? " तेन पृच्छा कृता।

" यस्य शिरसि ज्योतिः स कबीर इति वेत्तु भवान्। तयोक्तं अथ भक्तः कबीर दर्शनोत्सुकः सन् श्मशानं प्रतस्थे ।

तत्र गत्वा अन्त्यसंस्काररता नैके जना आसन्। चितां रचयित्वा पार्थिवदेहं तत्र स्थापितवन्तः। तदा भक्तेन सर्वेषां शिरःसु ज्योतींषि दृष्टानि। तेन भ्रान्तचेताः स कबीरं वेत्तुं न क्षमोऽभवत्। तथापि तत्रैव स्थित्वा तेषु कबीरमन्वेषुमारेभे। चितां प्रज्वलितां वीक्ष्म कबीर उवाचः " भवन्तः स्नानं कृत्वा

स्वगृहं यान्तु। अहं अस्य प्रेतस्य मस्तकस्फोटादूर्ध्वगृहां व्रजामि।" तथेत्युक्त्वा

ते गंगाजलं स्नानाय प्रविष्टाः। स्नात्वा ते यावद् बहिरागतास्तदा तेषां ज्योतींषि लुप्तानि। कबीरः स्नानाय प्रविष्टो जलाद्बहिरागतस्तदा तस्य शिरसि ज्योतिः पूर्ववदासीदिति भक्तेन दृष्टम्। तेनायमेव कबीर इति भक्तो निश्चयं गतः। कबीरं प्रणम्य स्वपरिचयं प्रदायच पप्रच्छ। ''भोः साधुवर्य! एतज्जयोतिर्भवन्मस्तके दृश्यते तस्य को भावः? तद् भवान् तस्य स्पष्टीकरणं विदधातु।''

''केनेदभुक्तं, मच्छिरसिज्योतिरिति। ''कबीरोऽपृच्द्दत्। ''भवत्पत्न्या। ''तेनोक्तम्। '' तदा तामेव पृच्छ।'' कबीरेण भणितम्। एवं वदन्तौ तौ बबीरसदनं प्राप्तौ। भक्तहरिदासोऽपृच्दत्-'' देवि! इदं ज्योतिर्नाम किम्?'' सा उदतरत्-वैराग्यस्य ज्यतिः हरिदासः पुनः पृष्टवान्- ''श्मशाने सर्वेषां शिरसि ज्योति र्दृष्ठम् तत्कथमिव?''

साऽभणत्-'' श्मशानं गतानां सर्वेषां वैराग्यं जायत एव-नः सर्वेषांगतिरियमेवेतिः परं स्नानाद्ध्र्वं तल्लुंपति। कबीरस्य गतिर्न तथाः तद्वैराग्यं क्षणिकं न, तत्स्थायिः प्रपञ्चं कुर्वनापि स विरक्तः, अतस्तद्वैराग्यज्योतिः सर्वदा दीप्तमेव, नात्र सन्देहलेशोऽपि।

आकर्ण्य तद् हरिदासः पुनः पुनः कबीरं ववन्दे।

**- एम.ए.पीएच.डी, साहित्यविशारद,**
**श्रीनाथ मंदिर, मु.पो.ता. उमरगा**
**जि. उस्मानाबादः-४१३६०६**

# वद मम् मित्र सुदामन् भो

सङ्कलकः- अजीत सिंहः

वद मम मित्रः सुदामन् भो त्वं चिरकालादायातः

बाल्यकाले आयासि स्म, नित्यं क्रीडित्वा यासि स्म।
अभवत् बहुधा संवादो नौ त्वं चिरकालादायातः।।
वद मम.................................................................

कथय भ्रातृजायाः वृतान्तं, अप्यास्ते कुशल परिवारः।
अयि ममाभिष्ट सुदामन् भो त्वं चिरकालादयातः।।
वद मम.........................................................

अधुनाप्यागच्छः त्वं काले, आगत्योपविश इह पीठे
हरामि त्वद्दारिद्र्यं भो त्वं चिरकालादायातः। ।।
वद मम..................................................................

हे मम मित्र श्रेष्ठ आयाहि, कथं दुर्भिक्ष्यमेतज्जातम्।
कथं भ्रमसि प्रतिद्वारं भो त्वं चिरकालादायातः ।।
वद मम..................................

नित्यं वससि त्वं मम हृदये तव विस्मरणं मम विस्मरणम्।
विस्मृतं मम प्रेम सुदामन् भो त्वं चिरकालादायातः ॥
वद मम मित्र.............................................................

**– श्री महावीर विश्वविद्यापीठ**
**ए-6 पश्चिम विहार**
**नई दिल्ली – 63**

# बालककृतं पुस्तकवर्णनम्

- प्रो० कमलेशकुमार छ.चोकसी

(साम्प्रतिके समाजे प्रौढानां ग्रन्थमैत्री प्रासङ्गिकी भवति। तैः यदा अवकाशः प्राप्यते तदा मैत्री क्रियते। साऽपि प्रतिदिनं न। अथ तादृशी मैत्री समागते धनप्राप्त्यादिकार्ये भग्नापि भवति। एषा वास्तविकी स्थितिः परन्तु बालानां ग्रन्थानां च दृढा मैत्री दृश्यते। यतोहि बालाः प्रतिदिनं प्रतिक्षणं गृहे शालायाम् च सततं ग्रन्थस्य सम्पर्के भवन्ति। वर्गकार्याय गृहकार्याय वा तैः येन केन प्रकारेण ग्रन्थः सेवनीयो भवति। किमधिकम्, विना ग्रन्थम् अध्यत्वे कोऽपि बालः छात्रमेव भवितु नार्हति। अतः आधुनिकाः बालाः सर्वदा सग्रन्थाः भवन्तीति ते ग्रन्थं सम्यक् अवगच्छन्ति। तादृशः कश्चित् बालकः अत्र स्वकीयेन बालस्तरेण ग्रन्थवर्णनं करोति षोडशैः निम्नलिखितैः पद्यौः।)

पुस्तकाय नमस्तुभ्यं ज्ञानसंग्रहरूपिणे।
ज्ञानेन भवति मोक्षः त्वं मोक्षदम् भव।। १।।

पुस्तकाय नमस्तुभ्यं ज्ञानसंग्रहरूपिणे।
ज्ञानं देहि यतो धनम् धनाद् धर्मः ततः सुखम्।।२।।

पुस्तकाय नमस्तुभ्यं त्वं हि ज्ञानोदधिरसि।
प्रदेहि त्वद्गतं रत्नं येन सौख्यं भजाम्यहम्।। ३।।

पुस्तकाय नमस्तुभ्यं ज्ञानामृत प्रवर्षिणे

अमृतं वर्षय देव येन तृप्तिर्भवेत् मम।।४ ।।

पुस्तकाय नमस्तुभ्यं ज्ञानवारिप्रवर्षिणे।

वारि वर्षय हे देव आचम्य अमृतो भवेत्।। ५।

पुस्तकाय नमस्तुभ्यं साक्षात् सद्गुरुरूपिणे।

ज्ञानं प्रदेहि येनाहं ज्ञानी भवामि निश्चितम्।।६।।

पुस्तकाय नमस्तुभ्यं विद्यासागररूपिणे।

सागरमिव रत्नं मे प्रदेहि तव मन्थनात्।७।।

ग्रन्थाय गुरुरुपाय गुणिने ज्ञानरुपिणे।

नित्यं तुभ्यं नमस्सन्तु शुभाशीषः प्रदेहि मे।। ८।।।

अस्ति गुरुतरो ग्रन्थः गुरुस्तु गुरुरेव हि।

काले गुरुसंयोगः ग्रन्थयोगस्तु सर्वदा।।।९।।

एकदेशस्थितो गुरुः शिष्यान् बोधयति स्वकान्।

सर्वदेशगतो गन्थः नैकान् बोधयति यदा।।१०।।

अपेक्षते गुरुः सेवां शिष्यतः सुखदायिनीम्।

ग्रन्थस्तु जडरूपत्वात् शिष्यसेवां न वाञ्छति।।११ ।।

कृषकसेवितो वृक्षः काले हि फलदो भवेत्।

छात्रसेवितग्रन्थोऽयं काले ह्यमृतदो भवेत्।।१२।।

यथा कूपगतं वारि परिश्रमेण प्राप्यते।

तथा ग्रन्थगतं ज्ञानं परिश्रमेण प्राप्यते।।१३।।

घटो हि रज्जुसंयुक्तो गत्वा कूपतलं सदा।

भूत्वा च जलमग्नोऽयं स्वस्मिन् धारयति जलम्॥१४॥

तथैव तपसंयुक्तो गत्वा ग्रन्थतलं जनः।

निमग्नः पठने तस्य ज्ञानरत्नमयो भवेत्॥ ।१५॥

बहिर्त बहुरूपायाभ्यन्तररैकस्वरूपिणे

ज्ञानरूपाय ग्रन्थाय नमोऽस्तु सततं मम॥१६॥

बहिर्त बहुरूपायाभ्यन्तरैकस्वरूपिणे।

ज्ञानरूपाय ग्रन्थाय नमोऽस्तु सततं मम॥१७॥

**- संस्कृतविभागः,**

**भाषासाहित्यभवन, गुजरात युनिवर्सिटी,**

**नवरंगपुरा, अहमदाबादः- 380009**

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।